International Journal of Sanskrit Research 2019; 5(4): 197-202

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 197-202
© 2019 IJSR
www.anantaajournal.com
Received: 13-05-2019
Accepted: 15-06-2019

**सन्दीप वसन्त जोशी**
शोधच्छात्रः, रा.सं.सं.
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्णाटकराज्यम्, भारत

Correspondence
**सन्दीप वसन्त जोशी**
शोधच्छात्रः, रा.सं.सं.
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्णाटकराज्यम्, भारत

# विरोधालङ्कारविमर्शः

## सन्दीप वसन्त जोशी

**शोधसारांश**
सादृश्यमूलकालङ्काराणाम् उपमेव समेषां विरोधमूलकालङ्काराणां मूलतया विरोधालङ्कारः वर्तते । कार्यकारणभावाधाराधेयभावादिभिरस्पृष्टतया शुद्धविरोधस्यैव प्राधान्येन चमत्कारजनकत्वात् विरोधालङ्कारः स्वतन्त्ररूपेण आलङ्कारिकैः स्वीकृतः । सोद्देश्यं परस्परं विरुद्धानां वस्तूनाम् एकस्मिन्नेवाधिकरणे स्थापनेन विरोधालङ्कारः भवति। कारणान्तरकथनेन विरोधस्य परिहारः भवति । विरोधस्य दश भेदाः प्रायः सर्वैः आलङ्कारिकैः स्वीकृताः । विरोध-विरोधाभासयोः सूक्ष्मः भेदः अस्ति । अपि शब्दस्य प्रयोगे विरोधः वाच्यः भवति । विभिन्नेषु रसेषु अयमलङ्कारः औचित्यमावहति ।
**शोधोद्देश्यम्:** विरोधालङ्कारस्य विमर्शनेन तस्य मौलिकं रूपं दृग्गोचरं भवति । विभिन्नैः आलङ्कारिकैः प्रतिपादितम् विरोधालङ्कारस्य स्वरूपं स्पष्टं भवति । विरोधः विरोधाभासयोः सूक्ष्मः भेदः स्पष्टीक्रियते । अपि शब्दप्रयोगे विरोधस्य वाच्यत्वं प्रतिपाद्यते। विभिन्नप्रसङ्गेषु विरोधालङ्कारस्य सन्दर्भोचितं पात्रं स्पष्टं भवति ।

**कुट शब्द:** विरोधालङ्कारविमर्शः

## प्रस्तावना
सहानवस्थानं विरोधः इति उच्यते । लोके कयोश्चित् वस्तुनोः सहानवस्थाननियमः दृश्यते । ययोः वस्तुनोः सामानाधिकरण्यं न युज्यते तयोः विरोधः इति उच्यते । यथा जलाग्न्योः, घटघटाभावयोः, तत्त्वज्ञानमिथ्याज्ञानयोः इति । एतेषां वस्तूनां सहभावः लोके कदापि न दृश्यते । एतादृशानां परस्परविरुद्धानां वस्तूनां सामानाधिकरण्येन वर्णनं लोके दोषाय भवति । परन्तु एतदेव वर्णनं काव्यशास्त्रे अलङ्काराय कल्पते । काव्यशास्त्रे अपि परस्परं विरुद्धानां वस्तूनां वर्णनेन भासमानः विरोधः कारणान्तरेण परिहार्यते । काव्येषु विभिन्नानां भावानां प्रसङ्गानां विरोधस्य माध्यमेन कृतं वर्णनं चमत्कारं जनयति ।

'वि'उपसर्गात् 'रुध'धातोः भावार्थे घञ्प्रत्यये कृते 'विरोध' इति शब्दः निष्पद्यते । इष्टार्थभङ्गः विपरीतार्थकत्वं वा विरोधस्य लक्षणं भवति । लोके ययोः वैरुद्ध्यं परिगण्यते, ययोश्च विरोधस्य परिहारोऽपि नास्ति, तादृशयोः सामानाधिकरण्येन वर्णनम्, तस्य च विरोधस्य केनचिदन्येन कारणेन परिहार्यत्वं विरोधालङ्कारस्य बीजम् अस्ति ।
अयमलङ्कारः प्राचीनोऽस्ति। ऋग्वेदेऽपि अस्य प्रयोगो दृश्यते । यथा-

> 'नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते ।
> दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति ॥'[1]

अत्र नीचा अपि उपरि स्फुरन्ति, अहस्तासः अपि हस्तवन्तं सहन्ते, शीताः सन्तः हृदयं निर्दहन्ति इत्यादिषु विरोधालङ्कारः दृश्यते । काव्येषु विभिन्नरसान् तद्भावान् च विरोधः पोषयति । भरतं कुन्तकं च विहाय प्रायः सर्वैः आलङ्कारिकैः अयमलङ्कारः स्वीकृतः । प्रमुखानामलङ्कारिकाणां लक्षणानुरोधेन अलङ्कारस्यास्य विमर्शनमत्र क्रियते ।

**विरोधालङ्कारस्य स्वरूपम्**

विरोधालङ्कारे परमार्थतः विरोधाभावेऽपि विरोधो भासते। कारणान्तरेण अस्य विरोधस्य परिहारः भवति । परिहारे असति अयं विरोधः दोषाय भवति । जातिगुणक्रियाद्रव्याणां परस्परविरोधेन अयं विरोधः दशधा विभज्यते ।

१) जातेः जात्या सह विरोधः यथा

अभिनवनलिनीकिसलयमृणालवलयादि
दवदहनराशिः।
सुभग कुरङ्गदृशोऽस्या
विधिवशतस्त्वद्वियोगपविपाते ॥ [2]

अत्र नलिनीत्वादिजातीनां दवदहनत्वजात्या सह विरोधः । तस्य नलिन्यादिषु विरहोद्दीपकतया दवदहनत्वोपचारेण परिहारः । विरहिण्यावस्थावर्णनमत्र प्रयोजनम् ।

२) जातिगुणयोः विरोधः यथा

गिरयोऽप्यनुन्नतियुजो
मरुदप्यचलोऽब्धयोऽप्यगम्भीराः ।
विश्वंभराप्यतिलघुर्नरनाथ तवान्तिके नियतम् ॥ [3]

अत्र गिरित्वादिजातीनाम् उन्नत्वादिभिः गुणैः सह विरोधः । तस्य राजगतौन्नत्याद्यतिशयविवक्षया परिहारः । अत्र श्लेषमूलकः विरोधः ।

३) जातिक्रिययोः विरोधः यथा

यषां कण्ठपरिग्रहप्रणयितां संप्राप्य धाराधर-
स्तीक्ष्णाः सोऽप्यनुरज्यते च कमपि स्नेहं पराप्नोति च।

तेषां संगरसङ्गसक्तमनसां राज्ञां त्वया भूपते
पांसूनां पटलैः प्रसाधनविधिर्निर्वर्त्यते कौतुकम् ॥ [4]

अत्र खड्गत्वजातेः अनुरागस्नेहपराप्तिक्रियाभ्यां सह विरोधः। तस्य रुधिरसंपर्ककृतलौहित्यचैक्कण्यार्थकत्वात् परिहारः । एवं पासुत्वजातेः अलङ्करणक्रियया विरोधः । तस्यापि कण्ठं छित्वा धूलिधूसरकरणार्थकत्वात् परिहारः ।

४) जातेर्द्रव्येण सह विरोधः यथा

सृजति च जगदिदमवति च संहरति च हेलयैव यो नियतम् ।
वसरवशतः शफरो जनार्दनः सोऽपि चित्रमिदम् ॥ [5]

अत्र शफरत्वजातेः जनार्दनेन द्रव्येण सह विरोधः । स च लीलया सर्वसम्भवात् मत्स्यशरीरपरिग्रहस्य आगमसिद्धत्वात् परिहृतः । अत्र जनार्दनपदम् आत्मपरम् अतः तस्य द्रव्यत्वम् ।

५) गुणस्य गुणेन सह

सततं मुसलासक्ता बहुतरगृहकर्मघटनया नृपते ।
द्विजपत्नीनां कठिनाः सति भवति कराः सरोजसुकुमाराः ॥ [6]

अत्र कठिनत्वसुकुमारत्वयोः गुणयोः विरोधः । सः नृपतेः दानवशात्स्वयं गृहव्यापारनिवृत्त्या कालभेदेन परिहृतः ।

६) गुणस्य क्रियया सह विरोधः यथा ।

पेशलमपि खलवचनं दहतितरां मानसं सतत्त्वविदाम् ।
परुषमपि सुजनवाक्यं मलयजरसवत् प्रमोदयति ॥[6]

अत्र पेशलत्वपरुषत्वयोर्गुणयोः दाहप्रमोदक्रियाभ्यां सह विरोधः। स च सुश्रवत्वदुःश्रवत्वार्थकतया दहतिपदस्य संतापार्थकतया परिहृतः ।

७) गुणस्य द्रव्येण सह विरोधः यथा

क्रौञ्चाद्रिरुद्दामदृषद्दृढोऽसौ
यन्मार्गणानर्गलशातपाते ।
अभूत्नवाम्भोजदलाभिजातः स भार्गवः
सत्यमपूर्वसर्गः ॥ [7]

अत्र कोमलत्वगुणस्य क्रौञ्चाद्रिद्रव्येण विरोधः । स च भार्गवमहिम्नाभिजातपदस्य सुखवेध्यत्वपरतया परिहृतः ।

८) क्रियायाः क्रियया सह विरोधः यथा

परिच्छेदातीतः सकलवचनानामविषयः
पुनर्जन्मन्यस्मिन्ननुभवपथं यो हि गतवान् ।

विवेकप्रध्वंसादुपचितमहामोहगहनो
विकारः कोऽप्यन्तर्जडयति च तापं च कुरुते ॥[8]
अत्र जडीकरणतापकरणक्रिययोः विरोधः । विरहवैचित्र्येण कालभेदात् परिहारः ।

९) क्रियायाः द्रव्येण सह विरोधः यथा

अयं वारामेको निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः।

क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमाषास्यति मुनिः॥ [9]
अत्र पानक्रियायाः अगस्त्येन समुद्रेण च विरोधः । अगस्त्यतपःप्रभावातिशयेन तस्य परिहारः । अत्र प्रदीपकारदृष्ट्या असम्भवालङ्कारस्य निषेधः ।

१०) द्रव्यस्य द्रव्येण सह विरोधः यथा

समदमतङ्गजमदजलनिस्यन्दतरङ्गिणीपरिष्वङ्गात् ।
क्षितितिलक त्वयि तटजुषि शङ्करचूडापगापि कालिन्दी ॥ [10]

अत्र गङ्गायमुनयोः द्रव्ययोः परस्परं विरोधः स च कालिन्दीपदस्य श्यामाभामात्रपरत्वात् परिहृतः।

**लक्षणविमर्शः**
व्यासः (विष्णुधर्मोत्तरपुराणे) अन्यफलदा क्रिया यत्र वर्णिता भवति तत्र [11], अग्निपुराणे असङ्गच्छमानयोः (विरुद्धपदार्थयोः) यत्र विरोधपूर्वकत्वेन युक्त्या सङ्गतीक्रियते तत्र [12], दण्डी प्रस्तुतगतस्य उत्कर्षस्य प्रतिपादनाय वस्तुतः विरोधाभावेऽपि मुखतः विरुद्धत्वेन प्रतिभासमानानां पदार्थानां यत्र सहावस्थानं तत्र, [13] भामहः गुणस्य क्रियायाः विरुद्धं यत्र गुणस्य क्रियायाः वा वर्णनं क्रियते तत्र [14], उद्भटः कश्चित् विशेषं वर्णयितुं गुणस्य क्रियाया वा विरुद्धः अन्यः सजातीयः विजातीयो वा पदार्थः कविप्रतिभया यत्र वर्ण्यते तत्र [15] च विरोधालङ्कारमङ्गीकुर्वन्ति । उद्भटः भामहम् अनुकरोति। वामनेन अर्थस्य विरुद्धस्य इव आभासत्वं विरोधालङ्कारत्वेन स्वीकृतम् [16] । विरोधालङ्कारस्य लक्षणे ‘आभासत्व’दलं वामनः प्रथमतया निवेशितवान् । असङ्गति-विरोधयोः सूक्ष्मः भेदः वामनस्य काले स्पष्टः नासीत् अतः तस्य उदाहरणे असङ्गतिः स्पष्टतया लक्ष्यते । विरोधस्य ‘समकाले’ इति पदं निवेश्य लक्षणमितोऽपि स्पष्टीकर्तुं रुद्रटः प्रयत्नं कृतवान् । भोजः पदार्थानां परस्परमसङ्गतौ विरोधं स्वीकरोति । [17] मम्मटः वस्तुगत्या अविरोधेऽपि द्वयोः वस्तुनोः विरुद्धत्वेन अभिधानं विरोधालङ्कार इति प्रतिपादयति । [18] रुय्यकः विरुद्धतायाः आभासे विरोधाभासालङ्कारं स्वीकरोति । [19] जयदेवः गुणद्रव्यक्रियाजातीनां सम्बन्धानुपपत्तिकथने विरोधालङ्कारं, [20] श्लेषजन्यः विरोधः यत्र भवति तत्र विरोधाभासालङ्कारं च पृथगेव लक्षयति । [21] विश्वनाथः विरोधाभावेऽपि आपाततः विरुद्धवत्प्रतीतौ विरोधालङ्कारं प्रतिपादितवान् । [22] जगन्नाथः एकाधिकरणसम्बन्धत्वेन प्रतिपादितार्थयोः एकाधिकरणत्वेनासम्बन्धत्वेन भानं विरोधाभासालङ्कारः इति प्रतिपादितवान् । [23]
एतेषां लक्षणानां विमर्शनेन ज्ञायते यत् विरोधालङ्कारस्य लक्षणे प्रारम्भे तावत्स्पष्टता नासीत् । वामनः आभासत्वम् इति दलं प्रथमतया निवेशितवान् । रद्रटः समकाले इति पदं लक्षणे निवेश्य असङ्गतिविरोधयोः भेदं स्पष्टीकृतवान् । मम्मटः लक्षणं स्पष्टीकृत्य दशभेदानां स्वरूपम् उपस्थापितवान् । जयदेवः विरोधं विरोधाभासं पृथक् रूपेण उपस्थाप्य तयोः सूक्ष्मं भेदं लक्षितवान् । जगन्नाथः विरोधे अर्थद्वयं प्रतिपाद्य विरोधस्य सर्वथा निवृत्तिः निराकृतवान् ।

**विरोध-विरोधाभासयोः ऐक्यविचार**
यदि विरोध-विरोधाभासयोः विमर्शं कुर्मः, तदा तयोः पृथक्त्ववाद एव समीचीन इति भाति । यतः जाति-जात्योः विरोधादिषु कमपि सन्दर्भं पुरस्कृत्य विरोध उच्यते । उदाहरणार्थम्-

अभिनवनलिनीकिसलयमृणालवलयादिदवदहनराशिः ।
सुभग कुरंगदृशोऽस्या
विधिवशतस्त्वद्वियोगपविपाते ॥ [24]

अत्र नलिनीत्यादीनां दवदहनत्वमिति विरोधो वर्तत एव । किन्तु अन्ते ‘त्वद्वियोगपविपाते’ इति उक्तत्वात् झटित्येव वियोगजन्यत्वज्ञानेन विरोधपरिहारः भवति । अतः तत्र आभासः पद्यश्रवणसमनन्तरमेव नश्यति । अपि च लोके वियोगिनाम्, उन्मत्तानाम् चन्द्रादि-सुखदायकान्यपि दुःखदायकान्येन भवन्तीति दृष्टमेव । अतः न तावत्तीव्रतया विरोधोऽत्र भासते । किन्तु विरोधाभासस्य उदाहरणानि यदि पश्यामः तदा तत्र आभासः अर्थान्तरज्ञानपर्यन्तमपि तिष्ठतीति पश्यामः । अपि च तत्र अर्थान्तरं श्लेषमूलकमित्यपि वक्तुं न शक्यते । यतस्तत्र नानार्थपदानां

प्रयोगः भवति । अतः अभङ्ग-सभङ्गश्लेषयोस्तत्र न प्रसक्तिः। उदाहरणार्थम्-

**'मत्तमातङ्गगामिन्यः शीलवत्यः'**
इत्यत्र मातङ्गपदं नानार्थकम् । [25] शीलवत्यः इत्यनेन मातङ्गपदस्य विटार्थ एव झटिति भासते,'कथमेताः मातङ्गानां विटानां समीपं गत्वापि शीलवत्यो भवन्ती'ति । अत्र विरोधस्य आभासः तावत्पर्यन्तमपि तिष्ठति यावत्पर्यन्तं मातङ्गपदस्य गजार्थः नावगम्यते । अत्र यद्यपि अभङ्गश्लेषः इति वक्तुं शक्यते तथापि श्लेषे नानार्थपदानि नोपयुज्यन्ते । अतः अत्र श्लेषः वक्तुं न योग्यः । श्लेषे तु नानार्थपदप्रयोगं विना विरोधस्याभासः ।

**'अप्यन्धकारिणानेन जगदेतत्प्रकाशते'**
इत्यत्र 'अन्धकारिणा' इत्येतत् न नानार्थपदम् । किन्तु सभङ्गश्लेषद्वारा अर्थद्वयं प्रकाशयति । तथापि अन्धकारिणा इत्यत्र श्लेष इव अर्थद्वयस्य विवक्षा नास्तीति हेतोः श्लेषमूलकविरोधाभास इति वक्तुं शक्यम् । तस्य पदस्य 'अन्धकस्य शत्रुणा' इत्येवार्थः वक्तुर्विवक्षितः, न तु अर्थद्वयमपि ।
अतः नानार्थपदानुरोधेन 'मत्तमातङ्गगामिन्यः' इत्यत्र 'अप्यन्धकारिणा' इत्यत्र च विरोध-आभासस्य स्वरूपं भिद्यते ।
अतः विरोधालङ्कारात् विरोधाभासं पृथक् स्वीकृत्य तत्र श्लेष-नानार्थपदयोराधारेण द्वैविध्यं कल्पयितुमुचितमिति भाति । केवलविरोधालङ्कारापेक्षया विरोधाभासे रमणीयताधिक्यं दृश्यते ।

**विरोधालङ्कारे 'अपि' शब्दस्य विचारः**
सामान्यतः विरोधाभासस्थलेषु 'अपि' शब्दः विरोधस्य निर्वाहकः भवति । किन्तु तस्य प्रयोगाभावेऽपि एष अलङ्कारो भवत्येव किन्तु व्यङ्ग्यरूपेण । अतः 'अपि' शब्दस्य प्रयोगे विरोधाभासालङ्कारः वाच्यः, तदप्रयोगे व्यङ्ग्य इत्येव आनन्दवर्धनाचार्यादीनामपि अभिप्रायः । ध्वन्यालोकस्य द्वितीयोद्योते आनन्दवर्धनेन उभयथापि एष विचारः स्पष्टमुक्तः । शब्दशक्त्या साक्षादलङ्कारान्तरप्रतिभाया उदाहरणत्वेन,

तस्या विनापि हारेण निसर्गादेव हारिणौ ।
जनयामासतुः कस्य विस्मयं न पयोधरौ ॥ [26]

इत्येतत्पद्यं दत्त्वा, वृत्तौ-" अत्र शृङ्गारव्यभिचारी विस्मयाख्यो भावः साक्षाद्विरोधालङ्कारश्च प्रतिभासत इति विरोधच्छायानुग्राहिणः श्लेषस्यायं विषयः, न त्वनुस्वानोपमव्यङ्ग्यस्य ध्वनेः" इति स्पष्टीकृतवान् । अनेन अत्र विरोधाभासालङ्कारध्वनिर्नास्तीति सिद्धम् । अग्रे पुनः विरोधाभासालङ्कारध्वनेः इदमुदाहरणं दत्तम्-
'मत्तमातङ्गगामिन्यः शीलवत्यश्च, गौर्यो विभवरताश्च, श्यामाः पद्मरागिण्यश्च धवलद्विजशुचिवदना मदिरामोदनिःश्वसनाश्च,चन्द्रकान्तवपुषः शिरीषकोमलाङ्ग्यश्च, अभुजङ्गगम्याः कञ्चुकिन्यश्च, पृथुकलत्रश्रियः दरिद्रमध्यकलिताश्च, लावण्यवत्यः मधुरभाषिण्यश्च अप्रमत्ताः प्रसन्नोज्ज्वलमुखरागाश्च, अकौतुकाः प्रौढाश्च प्रमदाः ।' [27] इति । उभयोरपि परिशीलनेन तयोर्मध्ये अपिशब्दस्य सत्त्वम् अभावश्चेतेतद्वयमेव भेदकमिति स्फुटं दृश्यते । तयोः वाच्य-ध्वनिरूपयोः नान्यत् किञ्चिद्विनिगमकम् । अतः अपिशब्दप्रयोगे वाच्यत्वम् अप्रयोगे च ध्वनित्वमित्येव निर्णयः समीचीनः ।

**कविप्रयोगसमीक्षा**
नवरसरुचिराणि काव्यानि यदि अवलोकयामस्तर्हि विरोधालङ्कारः कविभिः बहुधा प्रयुज्यमानो दृश्यते । सन्दर्भस्य तीव्रता विरोधेन यथा प्रतीयते तथा सादृश्याभेदादिभिर्न । अतः बहुधा अस्यालङ्कारस्य प्रयोगः काव्येषु दृश्यते । प्रायः लोके वर्तमाना सर्वेऽपि विषया अस्याप्यलङ्कारस्य विषया भवन्ति ।

**कौटुम्बिकविषयः** रघुवंशे तृतीयसर्गे पुत्रप्राप्तेः अनन्तरं दिलीपसुदक्षिणयोः आनन्दस्य वर्णने प्रयुक्तं पद्यमिदम्,
रथाङ्गनाम्नोरिव भावबन्धनं बभूव यत्प्रेम परस्पराश्रयम् ।
विभक्तमप्येकसुतेन तत्तयोः परस्परस्योपरि पर्यचीयत ॥ [28]
पुत्रप्राप्तेः पूर्वं तयोः प्रेम्णः एकैवालम्बनमासीत् । पुत्रप्राप्तेः अनन्तरं तु आलम्बनद्वयं जातम् अतः तयोः प्रेम विभक्तम् । विभक्तस्य पदार्थस्य शक्तिः न्यूना भवतीति लोके दृश्यते ।अत्र तु विभक्तमपि प्रेम प्रवृद्धमिति क्रिययोः विरोधः । तत्र पुत्रप्राप्तेः आनन्दातिशयेन प्रेमप्रवृद्धिः इति विरोधपरिहारः ।

**भगवतः महिमा-**
एकैश्वर्ये स्थितोऽपि प्रणतबहुफले यः स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः परस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥ [29]

एकैश्वर्यमित्यनेन ईश्वरत्वं, कृत्तिवासाः इत्यनेन अकिञ्चनत्वम्, इति द्वयोः धर्मयोः विरोधः । सन्निहितकान्तत्वं जितेन्द्रियत्वमिति गुणयोः विरोधः । अष्टाभिः तनुभिः युक्तः अपि नाभिमानः इति गुणयोः विरोधः । ईश्वरे सर्वसम्भवात् परिहारः ।
शिशुपालवधमहाकाव्ये माघमहाकविः एनमलङ्कारं बहुधा प्रयुक्तवान् ।

प्रथमसर्गे, यदा नारदः कृष्णस्य दर्शनार्थमागतः तं स्तोतुमारभ्य तस्य महिमानं एवं स्तौति-

> लघूकरिष्यन्नतिभारभङ्गुराममूं किल त्वं त्रिदिवादवातरः।
> उदूढलोकत्रितयेन साम्प्रतं गुरुर्धरित्री क्रियतेतरां त्वया॥ [30]

इति । यथा अत्यधिकभारात् भारवाहकस्य अङ्गानि स्वयमेव भज्यन्ते तथैव असुराणां उपद्रवरूपभारात् पृथ्वी स्वयमेव त्रुटिता । तस्याः भारापसरणायैव त्वं भुवि कृष्णरूपेणावतीर्णः । किन्तु त्वमेव लोकत्रयमपि स्वकुक्षौ वहन् भारयुक्तोऽसि । अतः त्वं पृथिव्याः भारावतरणं न कृतवान्, किन्तु अधिकभारमेव तस्या उपरि स्थापितवानिति। अत्र लघुकर्ता गुरुकर्तेति चेति विरोधः । स्वावतारेण पृथिवीं गौरवयुतां कृतवानित्यनेन विरोधपरिहारः।

महाकविः कालिदासोऽपि एनमलङ्कारं बाहुल्येन प्रयुक्तवान्। कुमारसम्भव-महाकाव्यस्य पञ्चमसर्गे पार्वत्याः शिवविषयकप्रेम परीक्षितुमागतः ब्रह्मचारिवेषधारीशिवः तस्याः तपसः उद्देश्यं जानन्नपि, सख्युक्तं श्रुत्वा हर्षनिर्भरोऽभूत्, तथापि नाभिव्यञ्जितवान्-

> अगूढसद्भावमितीङ्गितज्ञया निवेदितो नैष्ठिकसुन्दरस्तया।
> अयीदमेवं परिहास इत्युमामपृच्छदव्यञ्जितहर्षलक्षणः॥ [31]

अत्र नैष्ठिकसुन्दर इत्यनेन यावज्जीवं ब्रह्मचर्ये स्थित इत्यर्थः । पार्वत्याः मनसि स्वविषयक-प्रेमातिशयं दृष्ट्वा हर्षपूर्णोऽपि वर्तते । एवं नैष्ठिकसुन्दरत्वम्-पार्वतीविषयकप्रेम इत्यनयोः विरोधः । किन्तु महादेवस्य तस्य एतदविरुद्धमिति विरोधपरिहारः।

नैषधीयचरितेऽपि अयमलङ्कारः बाहुल्येन प्रयुक्तो दृश्यते । प्रथमसर्गे नलस्य राज्यपालनस्य वैभववर्णनम्-

पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कृशस्तपस्विताम्॥ [32]

अत्र 'अधर्मोऽपि तपस्वितां दधौ' इति स्वभावविरोधः । राज्ञा नलेन सर्वथापि धर्मे स्थिरीकृते अधर्मस्यानवकाशतया स न्यूनतां प्राप । सर्वत्र धर्म एव आसीत्' इत्यभिप्रायोऽत्र विरोधपरिहारकः।

महाकविः बाणभट्टः कादम्बर्यां राजानं शूद्रकं, तस्य उदात्ततां च एवं वर्णयति विरोधाभासालङ्कारद्वारा-

"अपरिमितपरिवारजनमपि अद्वितीयम्, अनन्तगजतुरगसाधनमपि खड्गमात्रसहायम्, एकदेशस्थितमपि व्याप्तभुवनमण्डलम्, आसने स्थितमपि धनुषि निषण्णम्, उत्सादिताशेषद्विषदिन्धनमपि ज्वलत्प्रतापानलम्, आयतलोचनमपि सूक्ष्मदर्शनम् महादोषमपि सकलगुणाधिष्ठानम्, कुपतिमपि कलत्रचयवल्लभम्, अविरतप्रवृत्तदानमप्यमदम्, अतिशुद्धस्वभावमपि कृष्णचरितम्, अकरमपि हस्तस्थितसकलभुवनतलं राजानमद्राक्षीत्" ॥ [33]

तद्विपरीततया शबरसैनिकस्य नीचतां -"अभिनवयौवनमपि क्षपितबहुवयसम्, कृतसारमेयसंग्रहमपि फलमूलाशिनम्, कृष्णमप्यसुदर्शनम्, स्वच्छन्दप्रचारमपि दुर्गैकशरणम्, क्षितिभृत्पादानुवर्तिनमपि राजसेवानभिज्ञम्" [34] इति वर्णितवान्।

श्रीमद्भगवद्गीतायां गीताचार्यः कर्मयोगिनः कर्मणि प्रवृत्तिं वर्णयति अनेनालङ्कारेण-

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः॥ [35] इति।

**विरोधालङ्कारस्याभासस्थलम्**

विरोधालङ्कारस्य स्वरूपादिकम् उदाहरणानि च यदा पश्यामस्तदा अयमंशः स्पष्टो भवति यत् विरोध एव आपाततः द्रष्टव्यः, तस्य परिहारस्तु चिन्तनविषय एव भवेदिति । यदि परिहारोऽपि शब्दत उक्तो भवति तदा अस्यालङ्कारस्य तावत्सौन्दर्यं न भवति । उदाहरणार्थं, नैषधीयचरितस्य तृतीयसर्गे, सन्देशवाहकस्य हंसस्य आकाशगमने,

तस्या दृशो नृपतिबन्धुमनुव्रजन्त्यास्तं बाष्पवारि नचिरादवधीबभूव।
पार्श्वेऽपि विप्रचकृषे यदनेन दृष्टेरारादपि व्यवदधे न तु चित्तवृत्तेः॥ [36]

आकाशे यदा हंसः गतः तदा तमेव पश्यन्त्याः दमयन्त्याः नेत्रे अश्रुपूर्णे जाते। तेन समीपस्थोऽपि हंसः दूरस्थ इव न दृष्टः। यदा स हंसः दूरं गतः तदा तस्याः चित्तवृत्तौ वृत्तित्वात् समीप एव स्थितः इति अस्य श्लोकस्यार्थः । किन्तु अत्र समीपस्थोऽपि दूरस्थः, दूरस्थोऽपि समीपस्थ इत्यत्र यद्यपि विरोधो भासत एव तथापि 'समीपस्थोऽपि दूरस्थ' इत्यस्य विरोधपरिहारकः 'नेत्रयोरश्रुपूर्णता', 'दूरस्थोऽपि समीपस्थ' इत्यस्य परिहारकः 'चित्तवृत्तित्वम्' शब्दत उक्तमस्ति। अतः रमणीयता तावन्न्यूनैव । अत्र विरोधालङ्कारस्य सत्त्वम् अङ्गीकर्तुमशक्यमेव।

एवं विभिन्नेषु रसेषु विषयेषु च अयमलङ्कारः प्रयुज्यते । यथा 'रथाङ्गनाम्नोरिव भावबन्धनं' अस्मिन् पद्ये विरोधः शृङ्गारं, 'एकैश्वर्ये स्थितोऽपि' अस्मिन् पद्ये भक्तिरूपं भावं, 'त्यक्त्वा कर्मफलासङ्गम्' इत्यत्र शान्तरसं च पोषयति ।

एवं विरोधमूलकालङ्कारवर्गप्रवर्तकोऽयमलङ्कारः सर्वेषु रसेषु औचित्यमावहति ।

**निष्कर्षः**

विरोधमूलकालङ्कारेषु प्रधानोऽयमलङ्कारः अस्ति । व्यासादारभ्य जगन्नाथान्तं यावत् अस्यालङ्कारस्य लक्षणे उत्तरोत्तरं विकासः दृश्यते । बहुभिः विरोधविरोधाभासयोः अभेदः स्वीकृतः चेत् अपि तयोः सूक्ष्मभेदः तेषामुदाहरणानां विमर्शनेन स्पष्टतया अवगम्यते । अपि शब्दस्य प्रयोगेण विरोधः वाच्यः भवति । विरोधस्य दश भेदाः भवन्ति । विभिन्नेषु रसेषु प्रसङ्गेषु च विरोधः सन्दर्भोचितं पात्रमावहति । साधर्म्यमुलकानामुपमादीनाम् अलङ्काराणामिव विरोधमुलकः विरोधालङ्कारः अपि चमत्कारजनकः रसपोषकः अस्ति ।

**सन्दर्भग्रन्थसूची**


1. अमरसिंहः, अमरकोशः चौखम्बा संस्कृतसंस्थानम्, वाराणसी १९९७
2. आनन्दवर्धनः,ध्वन्यालोकः निर्णयसागरप्रेस, मुम्बई १९२८
3. उद्भटः,काव्यालङ्कारसङ्ग्रहः निर्णयसागरमुद्रणालायः, मुम्बई १९०३
4. कालिदासः, कुमारसम्भवम् चौखम्बा संस्कृत सीरीज् आफिस्, वाराणसी १९७६
5. कालिदासः, मालविकाग्निमित्रम् चौखम्बा संस्कृत सीरीज् आफिस्, वाराणसी २००८
6. कालिदासः, रघुवंशम् चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २००१
7. जगन्नाथः, रसगङ्गाधरः निर्णयसागरमुद्रणालयः, मुम्बई १८८८
8. जयदेवः, चन्द्रालोकः चौखम्बा संस्कृतसंस्थानम्, वाराणसी १९९६
9. दण्डी, काव्यादर्शः भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, पुणे १९३८
10. बाणभट्टः, कादम्बरी चौखम्बा संस्कृत सीरीज् आफिस्, वाराणसी १९५०
11. बाणभट्टः, हर्षचरितम् शूरनाड् कुञ्जन पिल्ल, त्रिवेन्द्रम् १९५८
12. भोजः, सरस्वतीकण्ठाभरणम् निर्णयसागरमुद्रणालयः, मुम्बई १९३४
13. मम्मटः,काव्यप्रकाशः चौखम्बा संस्कृत संस्थानम्, वाराणसी १९८२
14. माघः, शिशुपालवधम् चौखम्बा संस्कृत सीरीज् आफिस्, वाराणसी १९८५
15. रुद्रटः,काव्यालङ्कारः चौखम्बा विद्याभवन, वाराणसी १९६६
16. रुय्यकः,अलङ्कारसर्वस्वम् निर्णयसागरमुद्रणालयः, मुम्बई १८९३
17. वामनः, काव्यालङ्कारसूत्रम् चौखम्बा सुरभारती प्रकाशनम्, वाराणसी २००५
18. विश्वनाथः, साहित्यदर्पणम् चौखम्बा संस्कृतसंस्थानम्, वाराणसी २०११
19. व्यासः, अग्निपुराणम् चौखम्बा संस्कृत प्रतिष्ठानम्, देहली२००४
20. व्यासः, विष्णुधर्मोत्तरपुराणम् चौखम्बा संस्कृत प्रतिष्ठानम्, देहली२००४
21. व्यासः, श्रीमद्भगवद्गीता चौखम्बा संस्कृत प्रतिष्ठानम्, देहली २००५
22. श्रीपाद दामोदर सातवलेकरः,ऋग्वेदः स्वाध्यायमण्डलम्, पारडी, १९८५
23. श्रीहर्षः, नैषधीयचरितम् खेमराज श्रीकृष्णदास, मुम्बई १९२७.